Shri Raghunatha Temple MSS. Library,
JAMMU

No. ४५८४१

Title रुद्रक्रमः

Author श्री अनन्त देवः

Extent १८ Age ४

Subject स्तो. प. परिशिष्टं

© Dharmartha Trust J&K. Digitized by eGangotri

[illegible]

[illegible]

4541

2 double

F. = 18

© Dharmartha Trust J&K. Digitized by eGangotri

श्री:

३८

॥माणिक्यदेवकल्पस्येदंरुद्रसूत्रं॥
॥पत्राणिसप्तदश॥ २८२

रुद्रसूत्र

© Dharmartha Trust J&K. Digitized by eGangotri

॥श्रीगणेशाय नमः॥ ॐ सिद्धिबुद्धिप्रदातारं विघ्नव्यूहविदारणं। महागणपतिं वंदे भक्तकल्पम
हीरुहं॥१॥ श्रीनृसिंहरमानाथं सच्चिदानंदविग्रहं। विधीन्द्रादिशिरोराध्यं भक्तकामदुघं
भजे॥२॥ सच्चिदानंदरूपाय शिवादेहार्द्धधारिणे। नमः ॐकारवाच्याय शिवायाभीष्टदा
यिने॥३॥ याज्ञवल्क्यमुनीन्नत्वा कात्यायनमुनीं तथा। श्रीगुरून्पितरौ रुद्रग्रंथकर्तॄंस्तथा
परान्॥४॥ श्रुतिं शातपथीं वीक्ष्य बृहत्पाराशरीस्मृतिं। बौधायनमुनेः सूत्रं श्रीमदुद्धवसूनु
ना॥५॥ धीमतानंतदेवेन रुद्रसूत्रं विरच्यते। उपकाराय सर्वेषां पुरवाजसनेयिनां॥६॥ ॥ संबंधी=
अथ प्रातः पंचांगरुद्राणां न्यासपूर्वकं जपविधिं व्याख्यास्यामः। ब्राह्मणो विधिवत्स्नातो धृ
तविभूतिरुद्राक्षः सव्येपाणौ कुशान्दक्षिणेन पवित्रं चोपगृह्याचम्य स्वासने उदङ्मुख शिवाय॰
उपविष्टस्त्रिः प्राणानायम्य त्रिमात्रेण प्रणवमुच्चार्य श्रीगुरून्गणेशं लक्ष्मीनारायणंगु ॥१॥

त्रं

© Dharmartha Trust J&K. Digitized by eGangotri

= पंचमकारान्नैगन्यासान्वेषु ते पंच अंगरुद्राः। रुद्राणां रौद्राध्यायासकानां रुद्रदेवत्यानां मंत्राणां =

यामहेश्वरीवप्रणामेद्देशकानौस्मृत्वाकृतसंकल्पोन्येषुरुद्रादिषुमानपूजाभ्युदयिकेकलाविः
नायकशांतिंनवग्रहयज्ञमसंभवेग्रहयज्ञमेववाकृत्वाकृतस्वस्तिवाचनोभूतशुद्धिंप्राण
प्रतिष्ठांमातृकान्यासान्कुर्यात्सर्वमंत्रपूजाजपांगत्वादितितांत्रिकानैवेतिब्रह्मवादिनो
ऽवैदिकत्वाद्वैदिकमंत्रपूजाजपांगत्वाभावात्तेध्यापासनादावदर्शनात्कौतःसर्वानुक्र
मसत्रातोक्तंन्यासंकृत्वापंचांगरुद्रन्यासान्कुर्यादिनादेशेऽंगुष्ठानामिकाभ्यांपराशर
स्मृतिदृष्टानिपंचांगरुद्रन्यासरुद्रध्यानार्चनानिवक्ष्यामोऽभिधास्येयरुद्राणामित्य

भिधायेषेत्वादिषुमंत्रेषुरवंब्रह्मांतेष्वितिपाराशर्यःसमाम्नातत्वात्तेवंब्रह्मांतानामिषेत्वा
दिकानांमाध्यंदिनशाखायामेवसमधीतत्वात्कृदुक्तरुद्रेतिकर्त्तव्यताविधेर्माध्यंदिनशाखा
विषयप्रतीतेर्मनोज्योतिरबोध्यग्निर्मूर्द्धानंममध्यालिनइतिकएवशाखासमधीतपाठ

© Dharmartha Trust J&K. Digitized by eGangotri

स्य मनो ज्योतिरिति मंत्रस्य प्रतीकग्रहणात्तु तस्य सर्ववाजसनेयिशाखासाधारण्यात् सर्वय
जुःशाखासमधीताद्वाजसनेयिशाखासमधीतत्वं रुद्रं प्रशस्ततमं ब्रह्मवादिनो वदंत्यादि
त्यानीमानि शुक्लानि यजूंषीति श्रुतेः कृत्स्नत्वेनाम्नातत्वात् अन्ययजुषां बहुत्वादयः
स्वपरंपरापरिगृहीतयजुःशाखासमधीतरुद्रजपादि कुर्युरिति ब्रह्मवादिनःपार
म्पर्यगिनो येषां वेदः स परिबृंहणः ॥ तच्छाखं कर्म कुर्वीत तच्छाखाध्ययनं तथेति वसि
ष्ठस्मृतेः स्वाध्यायोऽध्येतव्य इति श्रुतेर्नैधीमो स्वो योऽध्येतव्य इति हि श्रुतिः ॥ २ ॥ अथ श्रौ
तः सर्वानुक्रमसूत्रोक्तन्यासं वक्ष्यामस्तस्य ब्रह्मयज्ञांगत्वं ब्रह्मयज्ञारंभे इति वचनाद्रु
द्रजपाद्यंगत्वमप्येके छंदः पुरुषमेनोनिर्ऋतो दिनः शरीरेभ्यस्सोमोनिर्वग्निर्लक्ष्म सम
द्ध्वबुध्न्यस्तस्याङ्गिरसी गोतमभरद्वाजौ अत्रेविश्वामित्रजमदग्नी नासिके वसिष्ठक शिवाय ॥ २ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

नैयथाशक्तिस्वर्णरूप्ययोर्निष्क्रंतदर्द्धंतदर्द्धंवापर्षत्सुरत्नोनिधायकरिष्यमाणप्रायश्चि
त्तांगत्वेनेदंगोवत्सनिष्क्रयद्रव्यंसभ्येभ्योदातुमहमुत्सृजेनममेतितद्दानं। तेचतद्विभज्य
गृह्णीयुः। ततोऽमुकस्यमेजन्मप्रभृतिअद्यदिनंयावत्ज्ञाताज्ञातकामाकामसकृ
दसकृत्कृतकायिकवाचिकमानसिकसांसर्गिकस्पृष्टास्पृष्टभुक्ताभुक्तपीतापीतस
कलपातकातिपातकोपपातकलघुपातकसंकरीकरणमलिनीकरणापात्रीकरण
जातिभ्रंशकरप्रकीर्णपातकानांसंध्येसंभावितानांपापानांनिरासार्थमनुग्रहंकृत्वा
प्रायश्चित्तमुपदिशंतुभवंतइत्युक्त्वातान्प्रार्थयेत्। आब्रह्मस्तंबपर्यंतंभवद्देशमिदंजग
त्त्रायद्दरक्षपिशाचादिसदेवासुरमानुषं। सर्वेधर्मविवेक्तारोगोप्तारःसकलाद्विजाः॥

अमुकशर्मणः ममा२

पर्षत्सुपप्रार्पणा२

२अद्येत्यादि०तिथौ१ सभ्याश्चतद्दृष्ट्वा विभज्यगृह्णीयुः

© Dharmartha Trust J&K. Digitized by eGangotri

रु·स्र·

पुत्रादिश्चेत् प्रायश्चित्तकर्त्ता तिष्ठति स्वस्थाने तन्नामनिर्देशः। सयथा। ममदेहेत्यत्रास्य देहस्य संशुद्धिमित्येवं
मूहः। मया कृतमित्यत्रैतत्कृतमिति। प्रसादः क्रियतां मह्यमित्यत्र क्रियतामस्येति। पवित्रोऽहं भवेयमित्यत्र पवित्रोऽयं भ
पा १ वेदिति। ~~...~~ मामित्यत्र एनमित्यूह्यं कर्त्तव्यं

ममदेहस्य संशुद्धिं कुर्वन्तु द्विजसत्तमाः। मया कृतं महाघोरं ज्ञातमज्ञातकिल्बिषं। प्रसादः क्रिय २ इति प्रणम्य
तां मह्यं शुभानुज्ञां प्रयच्छथा। एज्यैः कृतः पवित्रोऽहं भवेयं द्विजसत्तमैरिति· ततो मामनुगृह्णन्तु भवं
पश्चित्तिना २ तः इत्युक्त्वा पुनः प्रणमेत्· ततस्ते सर्वमुत्सार्य पर्षदुचितं तद्विचार्यात्रायं शास्त्रदृष्ट इति निश्चित्य
पुस्तकवाचनपूर्वकं अनुवादकस्याग्रे कथयेयुः। अनन्तरं प्रायश्चित्तिना चंदनादिभिः पु
स्तकस्य पूजनं· सभ्यानामनुवादकस्य च पू· पुस्तकाग्रे यथाशक्ति द्रव्यनिधानं· कृतां
जलिपुटेनावस्थानं। ततोऽनुवादका यथापापानुसारेण प्रतिरूपदक्षिणादानं।
एकेन पर्षद्वृद्धेन प्रायश्चित्तस्वरूपस्यानुवादः कार्यः। सच। शृणुध्वं भो इदं विप्रायत्त
वादिशतेव्रतं। तत्तोयस्मै कर्त्तव्यमन्यया तद्ध्याम वेद्· इति· अनुवादकेनतु· अमुकशर्म शिव·

2/2

© Dharmartha Trust J&K. Digitized by eGangotri

रूपो वागग्निर्गायत्रीछंदोऽग्निर्देवता ॐ शिरसि विन्यसेत् देवमेवोऽस्मि हं सवितारं यो वास्त्वनूके
बृहती बृहस्पतिर्वायो वृहद्धृदयं तरे द्यावापृथिवीमध्ये त्रिष्टुभमिंद्र ॐ श्रोत्र्योर्जगतीमा
दित्यं मेढ्रे ति छंदः संप्रजापतिं पायौ यज्ञायज्ञियं वैश्वानरमूर्वोरनुष्टुभं विश्वान्देवान्
ष्ठीवतोः पङ्क्तिं मरुतः पादयोर्हिंपदं विष्णुं मालेषु विछंदसं वायुं मूर्ध्निनातिरिक्तेष्वंगे
षु न्यूनाक्षरं छंद आपो देवता नेत्येवं स सर्वांगेषु प्रणवादि चतुष्पदं नमोंतं योजयित्वा
वेदमयः संपद्यते शतपानुयह समर्थो भवति ब्राह्मं तेजश्च वर्द्धते न कुतश्चिद्भयं वि
दते स ऋग्मयो यजुर्मयः साममयस्तेजोमयो ब्रह्ममयोऽमृतमयः संभूय ब्रह्मैवाभ्ये
ति तस्मादेतन्नाब्रह्मचारिणे नातपस्विने नासंवत्सरोषिताय नाप्रवक्त्रे नुब्रूयादित्या
ह भगवान्कात्यायनः ॥२॥ अथ पंचांगरुद्रन्यासो मनोजूतिरिति हृदि विन्यसेत् मनो

© Dharmartha Trust J&K. Digitized by eGangotri

रु०न्य०
३

ज्योतिरिति काएवानाम्बोध्यग्निरिति शिरसि मूर्द्धानं दिवइति शिखायाम्मर्माणि तइ
२इत्यस्त्र ति कवचं मानस्तोकेमिति प्रथमो यातेरुद्रशिवातनूरघोरेति चूडायामस्मिन्महत्य शिखा
र्णवइति शिरस्यसंख्यातासहस्राणीति ललाटे त्र्यंबकंयजामहइति द्वौ नेत्रयोर्मा
नस्तोक इति नासिकायामवतत्य धनुरिति वक्त्रे नीलग्रीवाइति द्वौ कंठे नमस्त आ
युधायेति प्रकोष्ठयोर्येनीच्छोनीति हस्तयोर्नमो वः किरिकेभ्य इति हृदये नमो हिरण्य
३ बाहव इति नाभौ विमारुद्रायेति गुह्ये मा नो महान्तमित्यूर्वोरेष ते रुद्र भाग इति जान्वो
रव रुद्रमिति जंघयोरध्यवोचदिति कवचं नमो बिल्मिने इत्युपकवचं नमोस्तु नील
ग्रीवायेति मुष्टितो विमुञ्च्यामध्यमया नेत्रं प्रमुंच धन्वनस्त्वमित्यस्त्रं य एतावंत शिवाय०
श्चेति दिग्बंधः इति द्वितीयो ब्रह्मरंध्रनासिकाललाटास्यकंठहृदयदक्षिणवामक ॥३॥

ॐ नमः मूर्द्ध्नि। ॐ नं नमः नासिकायां। ॐ मों नमः ललाटे। ॐ भं नमः मुखमध्ये। ॐ गं नमः कंठे। ॐ वं नमः हृदये। ॐ तें नमः दक्षिणहस्ते। ॐ रुं नमः वामहस्ते। ॐ द्रां नमः नाभौ। ॐ यं नमः पादयोः॥ =

© Dharmartha Trust J&K. Digitized by eGangotri

रनाभिपत्सु दशार्णस्यैव सान्द्रिप्रणवादीन्नमोन्तान्न्यसानुस्वारान्तक्रमान्न्यसेदिति तृतीयस्त्रा
तारस्मिंद्वं त्वन्तोस्मन्नेतवसुगन्तु पथामसुन्वंतंते त्वायामग्नोनिद्युड्ढिर्वयॐ सोमतमीशा
नमस्मेरुद्राः स्योना पृथिवीति दशमंत्रैर्हृदशादिक्षु प्राच्यादिषु संपुटकुर्यादिति मंत्रैरिन्द्रा
दीन्दिक्षु प्रणमेदिति तुरीयः षडंगानि तन्मुद्राभिः शैवीभिर्न्यसेच्छिवसंकल्पॐ हृदयमेके
वसंकल्पाएवानां पुरुषसूक्तॐ शिरउत्तरनारायणॐ शिखाऽप्रतिरथं कवचमाशुः शिशा
न इति द्वादशार्च्चमप्रतिरथमित्याचक्षते स्माद्ध्यायाऽप्रतिरथं जपतामाशुः शिशानो वृषभो नभी
म इत्यैन्द्र्यो भिरूपा द्वादश भवंतीति श्रुतेर्बिभ्राडित्यनुवाको नेत्रॐ शतरुद्रियमस्त्रॐ शै
द्रोध्यायॐ शतरुद्रियमित्याचक्षते तेषामिष्वहवैत्रीणि च शतान्येतच्छतरुद्रियमथत्रि
ॐ शादथ पंचत्रिंॐ शदिति श्रुतेरिति पंचम एष ते रुद्रभाग इति मुद्रां प्रदर्शयेच्छिवपुष्टिः शिर

© Dharmartha Trust J&K. Digitized by eGangotri

रु॰ रु॰
४

शिवस्येति वचनात् क्लींकामः श्रीर्स्ति तेजस्कामो नेत्रयोः ऋद्ध्यादिकामो मुखे रोगनाशकामो ग्री
वायां ऽ सर्वकामो हृदये ज्ञानी नाभौ प्रजाकामो गुह्ये पशुकामो जंघयो ग्रामकामो जान्वो
राष्ट्रकामः पादयोर्वशीकरणकामो वामहस्ते पापक्षयाभिचारव्याध्यपगमकामो बहि
ः शरीरात्कुर्वीरन्नेवं समंत्राः प्रणवादिकाः पूजामंत्रैर्ध्यैवं न्यस्त तनुः साक्षाद्रुद्रो भवति ।
ध्यानं पंचास्यं ऽ सौम्यं ऽ सर्वाभरणभूषितं मृगलांछनमूर्द्धानं ऽ शुद्धस्फटिकसन्निभं फण
सहस्रविस्फूर्जद्दुरगेन्द्रोपवीतिनं ऽ समस्त्रिदिविजज्ज्वलज्जटाजूटकिरीटिनं ऽ स
हस्रकरविभ्राजत्तवद्भूषणादिविभूषितं ब्रह्मांडखंडवत्कारात्कपालवरे धारिणं दीप्य
मानं चंद्रार्कज्वलद्‍ग्निं त्रिनेत्रिणं कपालमाजिनमक्षमालानिःशेषवारिपूर्णकमंडलु
डमरुधारिणं केयूरबद्धनागेन्द्रमूर्द्धमणिविराजितं मेखलाकिंकिणीमालामुक्तारव

न्या

४

२

शिवाय॰॰
॥ना

© Dharmartha Trust J&K. Digitized by eGangotri

= सप्तहस्तेन दंडेन त्रिंशद्दंडा निवर्तनं । क्वचिद्दशहस्तेनेति पाठः । त्रिभागहीनं गोचर्ममानमाह प्रजाप
तिरिति ।=

विराजितं कङ्कणनूपुरधारिणं व्याघ्रचर्मपरिधानं व्याघ्रचर्मोत्तरीयं वरेण्यं गंगाधरं सुरार्चि
तं दातास्तं नमस्कृतमुमादेहार्द्धधारिणं मन्मथदहनं गंगांबिकाभोगसमाकुलं दिव्यदेवतास
मन्वितं सुरासुरनतं नित्यं शाश्वतमव्यक्तं सर्वव्यापिनं विश्वरूपं नंदिनमित्यात्मान
ं रुद्ररूपं ध्यायेत् ॥ ततोऽथार्घ्यं येदनुगुप्तेस्तु लिप्ते गोचर्ममात्रे भु चोद्देशे स्थंडिले वस्त्रा
छन्नेऽष्टदलमंबुजमालिख्य तन्मध्ये दशाक्षमालिखेदेतद्वर्णपीठं नमः शंभवायेति
समभ्यर्च्यमानो महान्तमितिसिद्धमंत्रं स्मृत्वाऽर्घमापूर्य गंधपुष्पाभ्यामभ्यर्च्य विद्व
त्वोऽसि मंत्रात्मानं संभारान्नेनोदकेन प्रोक्षेदर्घपूरणादिषु संभारप्रोक्षणं तेषु नम
ः शंभवायेति मंत्रः पुष्पै रक्तैर्वा पीठपूजां कुर्यात् पीठाध आधारशक्तिकूर्मानंतवराह
पृथिवीविचित्रदिव्यमंडपपदितः कल्पवृक्षस्तुवेदिवेदिकारत्नसिंहासनान्युपर्यु-

© Dharmartha Trust J&K. Digitized by eGangotri

पश्चिमपत्रेषु धर्मज्ञानवैराग्यैश्वर्याणि पादेषु तान्येवाकारपूर्वाणि गात्रेषु अनंतपद्मानंद
कंदसंविन्नालं प्रकृतिमयपत्रं विकारमयकेसरं लिपिमयकर्णिकाः सिंहासनोपरि
सानुस्वाराकारोकारमकारादीन् सत्वादीन् गुणान् क्रमतः पद्मदलकेसरकर्णि
कास्वेव मन्यानि त्रिकाणि द्वादशषोडशदशकलात्मसहितान्यर्कसोमाग्निमंडला
नि ब्रह्मविष्णुमहेश्वरानात्मांतरात्मपरमात्मनो ज्ञानात्मानं पद्मेस्याग्रतः प्रादक्षिण्ये
न पद्मपत्रेषु वामाज्येष्ठारौद्रीकालीकलविकरणीबलविकरणीबलप्रमथिनीसर्व्व
भूतदमनीः कर्णिकायां मनोन्मनीमित्येताः पीठदेवताश्चानुष्ठीनमोंतां ॐ नमो भग
वते सकलगुणात्मशक्तियुक्तायानंताय योगपीठात्मने नम इति पीठं पुष्पांजलिना सम शिवाय०
भ्यर्च्य सत्यज्ञानानंतानंदरूपं परंधामैव सकलं पीठं विचिंत्यास्य ललाटे पुनस्तेजोरू ॥५॥

© Dharmartha Trust J&K. Digitized by eGangotri

पं८॰ शिवं ध्यात्वा नमः शंभवायेत्यावाह्यासनं दद्यात् शालेन पाद्यमर्घ्यं नमः शंभवायेत्याच
मनीयं यातेरुद्रशिवातनूरस्मिन्महत्यर्णवेऽसंख्याता सहस्राणि त्र्यंबकं यजामहे इमा न
स्तोकेऽवतत्यधनुर्नीलग्रीवाद्दू नमस्तऽआयुधाय येतीर्थानि नमो वः किरिकेभ्यो नमो हि
रण्यबाहव इमारुद्राय मा नो महान्तमेषते रुद्रऽव रुद्राऽध्यवोचन्नमो बिल्मिने नमो सुनी
लग्रीवायमुंच त्रय एतावंतश्चोंनमो भगवते रुद्रायेति न्यास मंत्रैर्मानस्तोके नमः शंभवा
येति मंत्राभ्यां सहितैः मोंकारैर्गंधोदकेन देवं स्नापयित्वा स्नाना
चमनीयवस्त्राचमनीययज्ञोपवीताचमनीयगंधपुष्पधूपदीपनैवेद्याचमनीयानि
नमः शंभवायेति समर्पयेद् शालेन नमस्कृत्य प्रदक्षिणानीराजनपुष्पांजलिदानानि
नमः शंभवायेति कुर्यात्॥५॥ ॥ अथ पराशरबौधायनादिप्रोक्तविधिनाजपेऽछिव ९।

© Dharmartha Trust J&K. Digitized by eGangotri

= नतुपंचांगानि = = पूर्ववदित्यष्टप्रणवयुक्तमेव न त्वंत्यं सपंचांग मंत्रं =

संकल्प्यं पुरुषसूक्तं मुत्तरनारायणामप्रतिरथं विभ्राडिति पंचांग मंत्रान्जपित्वा षडंगम
न्त्रानित्येके तिस्रणां महाव्याहृतीनां ६ रुद्रस्य चाद्यावितिचत्वारो ४ ने चैवं मित्यष्टो प्र
णवाः अष्टप्रणवयुक्तं ६ रुद्र ६ सकृज्जपेद्वै क्रोधायप६ रुद्रमित्याचक्षते नीलसूक्तं ६ शां
त्यध्यायं चैवं म्नायो रुद्रः पूर्ववत् पंचांगमंत्रान्जपित्वा अष्टप्रणवयुक्तं ६ रुद्रमेकाद
श कृत्वो त्य६ सपंचांगमंत्रैर्वा जपेन्नीलसूक्तं ६ शांत्यध्यायं चैवं द्वितीयः षडंगानिज
प्त्वा पूर्ववद्रुद्रमेकादश कृत्वो नीलसूक्तं च सकृद्य ६ सोमेत्यष्टवं नीलसूक्तमित्याच
क्षते सप्तर्वंका एवानां ६ शांत्यध्यायं चैवं वा द्वितीयः पंचांगानिजपित्वा पूर्ववद्रुद्रमे
कादशकृत्वो जपेद्द्वंतरं तरावाजश्च मइत्यष्टानुवाकानामेकादशधा कृतानामेकं
मेकं जपेदां घे पठितेरुद्रे वाजश्च मइतिवत स्रो द्वितीयेसत्यं चेति चतस्रस्तृतीये ऊर्ध्व शिवाय ॥६॥

© Dharmartha Trust J&K. Digitized by eGangotri

= अनुवाकाः =

तिचतस्त्रस्तुरीयेश्याचेति तिस्त्रः पंचमेऽग्निश्चेत्यर्द्धेन्द्रसंज्ञाइति पंचानुवाकाः॥ अंशुश्चे
तिग्रहसंज्ञाः षष्ठेसप्तमेऽग्निश्चमेघर्मश्चमइति यज्ञक्रतुसंज्ञे एकाचेत्ययुक्स्तोमसं
ज्ञामष्टमेचतस्त्रश्चमइति युग्मस्तोमसंज्ञान्नवमेऽग्निश्चमइति वयःसंज्ञे दशमेवा
जायस्वाहेति नामग्राहकृत्यसंज्ञे एकादशेइति त्रयोविभक्ताः शांत्यध्यायं चैवं वा
द्वितीयः पंचांगमंत्रान्जपित्वा रौद्रोध्यायमेकादशकृत्वः शांत्यध्यायं चैवं वा द्वि
२ध्या॥१९ तीयोऽस्य रुद्र इत्याख्यैनः॥ सकृदावर्त्य ब्रह्महत्यादिभिः सर्वैर्महापापैर्मुक्तो भवतीत्या
हुरत्रिपराशरशातातपाः रुद्रमावर्त्य रुद्रतां यातीति भगवान्पराशरो यावज्जीवं प्र
त्यह॥ रुद्रं जपेत्सर्वेषु ग्रहदोषेषु दुःस्वप्ने दुष्टदर्शने शाकिन्यादिग्रहदोषे ज्वरादिसर्व
रोगशांतिकामः सर्वपापक्षयकामः श्रीकामः पुष्टिकामः पुत्रकामः पशुकामः शिवत्वप्राप्ति

© Dharmartha Trust J&K. Digitized by eGangotri

रु॰ स्र॰ ७

कामोमोक्षकामःसर्वकामोरुद्रएकादशगुणश्चेद्रुद्रोनामिरेकादशभिर्महारुद्रंएतैरेके
दशभिरतिरुद्रःस्याज्जपांतइमारुद्रायेतिजपंनिवेद्यद्रापइत्यष्टांगंप्रणम्यविकिरिद्रे
तिविसर्ज्यशिवरूपोविरहेच्छिवरूपोविरहेत्॥१॥इतिरुद्रकल्पेप्रथमोऽध्यायः॥
अथपराशरबौधायनादिप्रोक्तंरुद्रहोमविधिंव्याख्यास्यामोविंशतिहस्तमष्ट
दशहस्तंषोडशहस्तंचतुर्दशहस्तंद्वादशहस्तंदशहस्तंवामंडपंकृत्वातस्यमध्यप्र
देशेएकंचमेखलायोनिनालनाभियुक्तमाकृतिसंख्यामानोक्तमानंचतुरस्रंकुंडंकुर्या
त्तयोरसंभवेतत्प्रमाणंचतुरस्रंचतुरंगुलोच्छ्रितंस्थंडिलंकुर्यात्तस्मादीशान्यामरत्नि
प्रमाणंचतुरस्रंद्वादशांगुलोच्छ्रितंवस्त्राच्छन्नांरुद्रार्थंवेदिंकुर्यात्मनुष्यनरेन्द्रबालयो शिवाय॰
र्विद्रामनगरदेशाजाविकाश्वकुंजरेषूपद्रुतेषुमारीरोगरिपुभयेषुसर्वकामःपायसे ॥७॥

© Dharmartha Trust J&K. Digitized by eGangotri

नाज्येन वा जुहुयात् ॥ जपांगहोमे चरुव्रीहितिलयवसमिधामन्यतमेन ॥ आसनोपवेशनाद्यास्व
स्तिवाचनान्तमुख्याहे कृत्वा शुक्लांबरधरः शुक्लमाल्यानुलेपनो गंधमाल्यफलादिभिः सर्द्धि
तवारिपूर्णकलशहस्तो मंगलवाद्यवेदमंत्रघोषाभ्यां ब्राह्मणसहितः सपत्नीको यज
मानो मंडपस्येतं प्रदक्षिणीकृत्य पश्चिमद्वारेण मंडपांतः प्रविश्य स्वायतनात्पश्चि
मत उपविश्य कृतजपरुद्रांगहोमसंकल्पो ॐ भूमिर्भूमिमवागान्माता मातरमप्यगा
त् ॥ भूयास्म पुत्रैः पशुभिर्यो नो द्वेष्टि स भिद्यतामिति भूमिं ७ स्पृष्ट्वा रक्षोघ्नमंत्रै
र्गौरसर्षपान्मंडपांतः सर्वतो विकीर्य आपोहिष्ठेति तृचेन कुशैः पंचगव्येन मंडपांतः स
र्वतः प्रोक्ष्य स्योना पृथिवीति मही द्यौरिति मंत्राभ्यां भूमिं ७ संप्रार्थ्य स्वस्ति न इन्द्र इति
त्रिर्जपेत् ॥ वास्तुमंडपदेवताश्च विधिवदर्चयेत् ॥ प्रक्षालितपाणिपादः स्वाचांतः स

© Dharmartha Trust J&K. Digitized by eGangotri

रु०स०
८

= आद्याभ्यनेऽनुवाकाभ्यामाद्यानुवाकास्तै स्त्रिभिः १८ नमो हिरण्य नमउष्णी २ नमस्तक्ष ३ श्रेष्ठाय ४ नमः स्रु
= नमस्ते इत्यारभ्य अर्भकेभ्यश्चवो नमः इत्यंतमेका। त्याय ५ नमः शंभवा ६ नमः पार्या ७ =
नमस्तक्षभ्य इत्यारभ्य सुधन्वने चेति द्वितीया। नमः स्रुत्याय चेत्यारभ्य जेभ्यो देवेभ्यः इति तृतीया =

पत्नीको ब्रह्मणा सहितः प्राग्द्वारेण मंडपातः प्रविशेदग्निस्थानात्पश्चादुपविश्य कुंडं वे
तत्सम्मृज्य कुशोदकेन प्रोक्ष्य श्वेतवर्णालंकृतायामुपरितनमेखलायामिदं विष्णु
रिति विष्णुं ६ रक्तवर्णालंकृतायां मध्यमेखलायां ब्रह्मजज्ञानमिति ब्रह्माणं कृष्ण
वर्णालंकृतायामधोमेखलायामिमा रुद्रायेति रुद्रं ६ रक्तवर्णालंकृतायां योना
वंबे अंबिके इति गौरीमावाह्य कुंडे स्थंडिले वा गृह्योक्तेन विधिनाग्निमुपसमा
पंचांगरुद्र न्यास ४ धाय छंदः पुरुषन्यासं कृत्वा ध्यानानि पूर्ववत्कृत्वा वेद्यां रुद्रमभ्यर्च्य पायसादिना चे
त्कूपयित्वाज्यभागान्तं विधायाग्निं ६ सनः पितेत्यभ्यर्च्य पंचांगमंत्रैः पुंवृभिः पंचा शिवाय०
हुतीर्हुत्वा नमस्त इत्यध्यायेनैकां त्रेधा विभक्तेन तिस्रो वाऽऽहुतीर्जुहोत्याद्यानुवाके ॥८॥
राद्याभ्यां द्वितीयां चतुर्भिस्तृतीयां षड्भिर्द्वेत्रकेऽवतानां तेन तृतीयां प्रत्यवरोहे स्ति

= नमस्ते० अर्भके० १ नमस्तक्ष० सुधन्वने च० २ नमः स्रुत्याय० ३ = एतावंतस्त्वेत्यस्यान्ते =
एतावंत० ३ नमोऽस्तु० ४ नमोऽस्तु० ५ नमोऽस्तु० ६

8

© Dharmartha Trust J&K. Digitized by eGangotri

= नमो वः किरि॰ १ देवाना॰ २ नमो द्वि॰ ३ नमो विहि॰ ४ नमस्मानि॰ ५ = = असंख्याता इत्याद यो ऽयतान संज्ञकाः =
= नमोऽस्तुविति त्रयः प्रत्यवरोहाः =

स्वः षोडशवाप्युवोदिते द्वे सहस्रालिसहस्रशइत्यग्नंतेन तृतीयाऽवंतानै हृशिभस्यवरोहै
स्मिस्त्वच्छतुश्चत्वारिंशद्वाषोडशाभिः प्रथमाभिः षोडशास मानुवाकैर्नमोवइत्यतः
प्राकसप्तनमोवः किरिकेभ्यइत्येकाद्भापइतिविंशत्याविंशतिरेष्टाचत्वारिंशच्छ
द्वानमोवः किरिकेभ्यइतिपंचव्याहृतिभिः पंचेत्येषाचत्वारिंशत॥श॥एकषष्ठ्यधि
कंशतंवाऽघाभिः षोडशाभिः षोडशोभयतोनमस्काराः षट्चत्वारिंशदन्यतरतो
नमस्कारानवसप्ततिर्द्रापिइतिविंशत्याविंशतिः पंचविंशत्युत्तरंचतुः शतंवा
= नमस्तेरु = ऽघापांगायत्र्यांत्रयः पादास्तएवत्रीलिवजूंषि अनुष्टुप्सु चत्वारश्चत्वारइत्येक
स्यांचत्वारिचत्वारिपङ्क्तिषुपंचपदाइत्येकैकस्यांपंचपंचसप्तस्वनुष्टुप्सुचत्वारश्चत्वा
रइत्येकैकस्यांचत्वारिचत्वारिजगत्योः षडतः प्रत्येकंषट्नमोहिरण्येतितिस्रोऽशी

= अध्यवोचदित्याद्यास्तिस्रषु = = यातेरुद्रशिवातनूरित्याद्यास्तिस्रषु =
= प्रानोमहान्तमिति ... = = अमीवाहुनीलग्रीवायेत्याद्यास्तु =

© Dharmartha Trust J&K. Digitized by eGangotri

रु॰ स॰ —
९

= देवा नाह हृदयेभ्य इत्यस्याऽनुषंगश्चतुर्थपि = = अपा विधिवत् = = नमोऽस्तु रुद्रेभ्य इत्यादयः प्रत्यवरोहाः । =

तयो नमो वः किरिकेभ्य इति चत्वार्यस्तानुवाके षोडश चतुष्पदा इत्येकैकस्यां चत्वारि चत्वारिंशी
दुष्टमेति पंच पदा इति पंच प्रत्यवरोहे द्वे केकस्मिंश्चतुर्दश चतुर्दश षष्टिश्च हवै त्रीणि च शता
न्येतच्छतरुद्रियमपत्रिंशदथ पंचत्रिंशादिति श्रुतेरेवमन्यतमेन विधिना विभक्तेन
रुद्रेण दशाकृत्वोकृत्वा पूर्ववत् सपंचांगमंत्रेणवैकादशेन जुहुयाद्रुद्रसमाप्तौ समाप्ता
वेकैकेन च मन्त्रविभागेन जुहुयात्सर्वावयर्षं सोमेति शिरसैकामंते शांत्यध्यायेन प्रति
मंत्रमेवं रुद्री महारुद्रातिरुद्राणामन्यतमेन यथाकामं जुहुयात् ॥ २ ॥ होमांते ग्ना
वग्निं पूर्ववदभ्यर्च्य स्विष्टकृतं महाव्याहृतीः सर्वप्रायश्चित्तं प्राजापत्यं कृत्वा दिक्पाले
भ्यस्त्वा द्विरंगैर्मंत्रैर्बलीन्हरति चतुर्गृहीतेन द्वादशगृहीतेन वाऽऽज्येनाच्छिन्नधारया शिवाय॰
समन्तेऽग्ने समिधः इति पूर्णाहुतिं जुहोति मूर्धानं दिव इति वा पुनस्त्वेति वा पूर्णाद ॥ ९ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

द्धीतिवेमं ॐ स्नानमित्यनुवाकेनवौदुंबर्यास्रुचापंचगृहीताज्येनसंततधारयाघृतेनौ
ग्राम्येवाजश्चमइत्यष्टानुवाकैर्वसोर्द्धारांजुहोतिजपांगहोमेप्रतिरूपंतिस्रस्तिस्रःपंच
पंचषट्षडष्टावष्टौदशादशैकादशैकादशवाकूतीर्नमःशंभवायेतिजुहोतिनाग
मंत्रैर्नशिरसानचमकानुवाकैर्नशंतिमंत्रैर्नमानस्तृष्टजादीनिस्वस्तिवाचनांतानी
तिविशेषोऽन्यन्नमानमाचार्यपब्राह्मणेवदक्षिणांदद्यात्द्विजश्चेत्तेभ्यश्चरुद्र
द्रर्ववदभ्यर्च्ययथाशक्तिब्राह्मणान्भोजयेत्॥७॥ अथातोमंत्रसिद्धिविधिंवक्ष्या
मोंगोष्ठारण्यसिद्धिक्षेत्रशिवालयाश्वगारनदीसमुद्रतीरपर्वतानामन्यतमेऽन्य
त्रवाशुद्धदेशेमनोरमेकंदमूलफलगोमूत्रयावकक्षीरदधिशाकाज्यहविष्यमन्य
तमानामन्यतमभोजनश्चरुभिक्षाशीवाधीरोदृढव्रतोमौनीजितक्रोधोजितेंद्रि

© Dharmartha Trust J&K. Digitized by eGangotri

10

यो धौतवासास्त्वधःशायी शिरस्नासह रुद्रसहस्रं जपेत् सो वै मंत्राः सिद्धाः स्युरिति तार्थफ
लमदा रुद्रस्यैव ब्राह्मणेंद्रस्य स्युरित्याह भगवान् पराशरः ॥ ५ ॥ अथ पराशरानु
क्रमविरोधिनं बौधायनोक्तं रुद्राभिषेकविधिं व्याख्यास्यामस्तीर्थे विधिवत्स्ना
तः शुचिः प्रयतो ब्रह्मचारी शुक्लवासाः सोमस्य दक्षिणे प्रत्यग्देशे तन्मुखोपविष्ट आच
मन प्राणायामादीनि स्वस्तिवाचनांतानि छंदः पुरुषन्यासपंचांगरुद्रन्यासान् कृत्वा
ऽऽत्मनि देवताः स्थापयेत् मजनने ब्रह्मा पादयोर्विष्णुर्हस्तयोर्हरो बाह्वोरिन्द्रो जठरेऽग्नि
र्हृदये शिवः कंठे वसवो वक्त्रे सरस्वती नासिकयोर्वायुर्नयनयोः सूर्याचन्द्रमसौ क
र्णयोरश्विनौ ललाटे रुद्राः मूर्ध्न्यादित्याः शिरसि महापुरुषः शिखायां चामुंडा पृष्ठे
पिनाकी पुरतः शूलपाणिः पार्श्वयोः शिवशंकरौ सर्वतो वायुः ततो बहिः सर्वतोऽग्निज्वालामा

शिवाय०
॥१०॥

© Dharmartha Trust J&K. Digitized by eGangotri

त्तापरिवृतः सर्वेषां गेभु सर्वा देवता तिष्ठन्तु तिष्ठतां तिष्ठं त्विति यथार्हं ॐ सर्वत्रानुषजेत्
त्येतिष्ठं त्वित्यनन्तरं मा ॐ रक्षं त्विति ब्रूयात् अग्निर्मे वाचि श्रितः॥ वागिति वाचं ॐ स्पृशेद्वा
युर्मे प्राणे श्रितः। प्राण इति हृदयं ॐ सूर्यो मे चक्षुषि श्रितः। चक्षुरिति चक्षुषी ॐ चन्द्र
मा मे मनसि श्रितः। मन इति वक्षो दिशो मे श्रोत्रे श्रिताः। श्रोत्रमिति श्रोत्रं आपो मे
रेतसि श्रिताः। रेत इति लिङ्गं पृथिवी मे शरीरे श्रिता। शरीरमिति शरीरमोषधिव
नस्पतयो मे लोमसु श्रिताः। लोमानीति रोमकूपानिन्द्रो मे बले श्रितः। बलमिति सर्वाङ्गा
नि पर्जन्यो मे मूर्द्ध्नि श्रितः। मूर्द्धेति मूर्द्धानमीशानो मे मन्यौ श्रितः। मन्युरिति हृदय
मात्मा म आत्मनि श्रितः। आत्मेति वक्षो हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणी १०
ति सर्वत्र पुनर्म आत्मा पुनरायुरागात्। पुनः प्राणः पुनराकूतं मागात्। वैश्वानरो

© Dharmartha Trust J&K. Digitized by eGangotri

रु० म०
११

रश्मिभिर्वा विधानः। अंतस्तिष्ठत्वमतस्य गोपा इति स्वं शरीरमात्मानं रुद्ररूपं ध्यायेद्यथो
क्तं पुरस्तात्॥ ८॥ अथात्मानमाराधयेदाराधितो मनुष्यैस्त्वं सिद्धैर्देवासुरादिभिः। आ
राधयामि भक्त्या त्वां गृहाण महेश्वरेति स्वात्मनि रुद्रमावाह्य त्र्यंबकं यजामह इति गंधा
दिभिरभ्यर्चयेद् घृष्टं रणार्चनाभिमंत्रणसंभारात्मप्रोक्षणानि कृत्वा पूर्ववत्सोमभ्यर्च्य
शिवलिंगादावाराधयेदावाहं तु हरेयः स्वैतसः श्वेतैरश्वैः सह केतुमद्भिः। वातोज
रैर्बलवद्भिर्मनोजवैरायाहि शीघ्रं मम हव्याय शर्वोमिति स्वहृदयकुहरात्सूर्यमंडला
द्वा देवमावाह्य स्थापितेसद्योजातं प्रपद्यामीत्यावाहनं दद्यात्सद्योजाताय वै नमो न
म इत्यासनं भवे भवेनातिभवे भवस्व मामिति पाद्यं भवोद्भवाय नमः वामदेवाय नम इ
त्यापो हिष्ठेति तिसृभिः स्नानं मंत्रकृत्वो जिस्तर्पयेद्भवं शर्वमीशानं पशुपतिं रु

मां० ३

शिवाय०
॥ ११॥

© Dharmartha Trust J&K. Digitized by eGangotri

द्रमुग्रंभीमंमहांतमितिदेवंतर्पयामीतिसर्व्वत्रज्येष्ठायनमइत्याचमनीयं॥श्रेष्ठायनमो

रुद्रायनमइतिमधुपर्कंकालायनमइतिगंधंकलविकरणायनमोबलविकरणायन

मोबलायनमोबलप्रमथनायनमइतिपुष्पांजलिंसर्व्वभूतदमनायनमइतिधूपंमनो

न्मनायनमइतिदीपंभवोद्भवायनमइतिनैवेद्यंमंत्रमिमंत्रैरष्टौपुष्पांजलिंभवायशर्व्वा

येशानायपशुपतयेरुद्रायोग्रायभीमायमहतइतिदेवायनमइतिसर्व्वत्राथास्याघो

रतन्त्ररघोरेभ्यस्तत्पुरुषायेशानःसर्व्वविद्यानामित्युपतिष्ठते॥७॥अथैनस्यशिवस्य

मूर्द्धनिहिरण्येनशौंकलेनसंततधारान्निषिंचेन्मधुनासर्प्पिषापयसावेक्षुरसेनालिके

ररसेनाम्ररसेनवैषामभावेगंधोदकेनकेवलोदकेनवार्घेनद्वितीयेनवारुद्रेणसर्व्वेषा

मंतेपूर्व्ववदभ्यर्च्येदेवंरुद्रंमहारुद्रानिरुद्राणामन्यतमेनयथाकाममभिषिंचेदभिषे

© Dharmartha Trust J&K. Digitized by eGangotri

12

कनिवेदनादिविसर्जनांतं पूर्ववद् दक्षीभ्यां ते नासिकाभ्यां कर्णाभ्यां छुबुकादधि। यक्ष्मं शीर्षण्यं
मस्तिष्काज्जिह्वाया विवृहामि ते। ग्रीवाभ्यस्त उष्णिहाभ्यः कीकसाभ्यो अनूक्यात्। यक्ष्मं दो
दोषण्य१मंसाभ्यां बाहुभ्यां विवृहामि ते। आन्त्रेभ्यस्ते गुदाभ्यो वनिष्ठोर्हृदयादधि। यक्ष्मं
मतस्नाभ्यां यक्नः प्लाशिभ्यो विवृहामि ते। ऊरुभ्यां ते अष्ठीवद्भ्यां पार्ष्णिभ्यां प्रपदाभ्यां। य
क्ष्मं श्रोणिभ्यां भासदाद्भंससो विवृहामि ते। मेहनाद्वनंकरणाल्लोमभ्यस्ते नखेभ्यः। य
क्ष्मं सर्वस्मादात्मनस्तमिदं विवृहामि ते। अंगादंगाल्लोम्नो लोम्नो जातं पर्वणि पर्वणि। यक्ष्मं
सर्वस्मादात्मनस्तमिदं विवृहामि त इत्यापो हि ष्ठेति तिसृभिरभिषिक्तोदकेन व्याधि
नो मूर्धादिपादान्तं सर्वांगाणि सम्मृज्यात् तापशमनार्थी व्याधिविमोचनार्थी जीवनार्थी। शिवाय॰
श्रीकामः शांतिकामः पुष्टिकामस्तुष्टिकामो मोक्षकामः कुर्यादेवं कुर्वं सिद्धिमवाप्नोति ॥१२॥

© Dharmartha Trust J&K. Digitized by eGangotri

वार्य्यापि दक्षिणां दद्याद्दश गाः सवत्साः सुवर्णभूषिता वृषभैकादशास्त्रदभावे एकां गां दद्याद्वि
सा हम्भगवान्बौधायनो ब्रह्मलोहिरत्वं यथाशक्ति ब्राह्मणान्भोजयेन्नमो भगवते वा
जसनेयाय याज्ञवल्क्याय नमो भगवते कात्यायनाय नमो भगवते कात्यायनाय ॥ ८ ॥
इति रुद्रस्नाने द्वितीयोऽध्यायः ॥ ॥ अथातो भस्मत्रिपुण्ड्रधारणविधिं व्याख्यास्यामः स
द्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः । भवे भवे नातिभवे भवस्व मां । भवोद्भवाय न
मः । वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकर
णाय नमो बलविकरणाय नमो बलाय नमो बलप्रमथनाय नमः सर्वभूतदमनाय न
मो मनोन्मनाय नमः । अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः । सर्वेभ्यः सर्वशर्वेभ्यो
नमस्तेऽस्तु रुद्ररूपेभ्यः । तत्पुरुषाय विद्महे महादेवाय धीमहि । तन्नो रुद्रः प्रचोदया

© Dharmartha Trust J&K. Digitized by eGangotri

रु० रू० १३

=गार्हपत्ये=

13

त्। ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मेऽस्त
स्तु सदाशिवोमिति पंचभिर्म्मनुभिर्न्नैर्विसमस्यान्यतरसं भवे भस्म परिगृह्य सव्ये कृत्वा द
क्षिणेन पिधायाग्निरिति भस्म वायुरिति भस्म जलमिति भस्म स्थलमिति भस्म व्योमेति
भस्म सर्वं ह वा इदं भस्म मन इत्येतानि चक्षूंषि भस्मानीति त्रिरभिमंत्र्यापो ज्योति रसो
मृतं ब्रह्म भूर्भुवः स्वरोमिति तस्मिन्न पञ्चास्य मानस्तोक इति संक्षुभ्येशानः सर्ववि
द्यानामिति शिरस्युद्धूल्य तत्पुरुषायेति मुखम् अघोरेभ्य इति हृदयं वामदेवायेति गुह्यं
सद्योजातमिति पादौ प्रणवेन सर्वांगानि त्रिधास्य प्रथमा रेखा साग्निर्गार्हपत्यश्चाकारो र
जो भूर्लोकश्चात्मा क्रियाशक्तिरृग्वेदः प्रातःसवनं महादेवो देवता [illegible]स्य द्वितीया रेखा शिवाय०
साग्निर्दक्षिणाग्निरुकारः सत्त्वमंतरिक्षमंतरात्मेच्छाशक्तिर्यजुर्वेदो माध्यंदिनं सवनं ॥१३॥

© Dharmartha Trust J&K. Digitized by eGangotri

महेश्वरो देवता यास्तृतीया रेखा साहवनीयो मकारस्तमो द्यौः परमात्मा ज्ञानशक्तिः सा
मवेदस्तृतीयं सवनं शिवो देवतेति ध्यायन् त्र्यंबकं यजामह इति त्र्यायुषमिति द्वाभ्या
मनामिकामध्यमांगुलीभिरनुलोमं शिरोललाटवक्षस्कंधेषु तिर्यक् तिस्रो रेखाः प्रकुर्वी
त मध्यरेखां विलोमामंगुष्ठेन कृत्वाऽनुलोममनामातर्जनीभ्यां रेखाद्वयं तिस्रो रे वा४
खा एवं वा कुर्वीत तनो दूलनं नेत्रयुग्मप्रमाणं स्नातो रुद्रजपहोमार्चनेष्वन्यत्रापि चैतन्नित्य
कं शांभवं व्रतमेतत्सर्वेषु वेदेषु वेदवादिभिरुक्तं तत्समाचरेन्मुमुक्षुरपुनर्भवाय ॥ १ ॥ अ
थातो रुद्राक्षधारणविधिं व्याख्यास्यामो महाव्रतं सर्वपापघ्नमिदमिति ब्रह्मवादिनो
वदंति रुद्रजपहोमार्चनेष्वन्यत्रापि चैतन्नित्यमानर्थक्यस्मरणाद्विविक्तदेशे सुखास
नस्थः शुचिः समशरीरग्रीवशिराः सर्वेन्द्रियाणि निरुध्य भक्त्या स्वगुरुं प्रणम्य हस्तुंड

© Dharmartha Trust J&K. Digitized by eGangotri

रीकं विरूजं विशुद्धं मध्ये विशदं विशोकं विचिंत्यं तस्मिन्नादिमध्यांतविहीनमेकं विभुं चिदा
नंदरूपमद्भुतं परमेश्वरं प्रभुं त्रिलोचनं नीलकंठं प्रशांतमुमासहायं चिंतयन् त्र्यंबकं य
जामह इत्यों नमः शिवायेति वा प्रतिष्ठितरुद्राक्षाणा ॐ सहस्रं प्रतिष्ठामंत्रयोरन्यतरे
णाधारयेद्देवं यो धारयेत्स रुद्रवद्भवेद्भावे सहस्रस्यैकः६ शिखायां ॐ शिरसि चत्वारि
६ शदिकं नयनयोर्मध्ये कर्णयोः षट्षट्कंठे द्वात्रिं६ शद्बाह्वोः षोडश षोडश करयोर्द्वा
दश द्वादश वक्षस्यष्टोत्तर६ शतं यो धारयेत्स रुद्रवत्पूज्यो भवेन्मुक्ताप्रवालस्फटिकरौ
प्यवैडूर्यकांचनैः समेतान्यो धारयेत्स शिवो भवेत्॥३॥ अथातो रुद्रविनियुक्तानां मं
त्राणामृषिदैवतछंदांसि ॐ स्वनुक्रमिष्यामो मनोजूतिर्बृहस्पतिरांगिरसो यजुर्विश्वेदेवाः ॥शिवाय॥
न्यबोध्यग्निर्बुधगविष्ठिरौ त्रिष्टुबग्निर्मूर्द्धानं भरद्वाजस्त्रिष्टुबग्निर्वैश्वानरो मम्यालि ॥१७॥

© Dharmartha Trust J&K. Digitized by eGangotri

विवस्वांस्त्रिष्टुब्लिंगोक्ता वातेरुद्रेत्यादीनां रौद्राध्यायादिनोपरिष्टाद्बृहत्यामो देशा स्त
स्य प्रजापतिर्विराड्बृहत्त्वां नारंगगीस्त्रिष्टुब्विंद्रस्त्वं ओ भ्यम्ना आंगिरसो हिरण्यस्तूप आ
ग्नेयी जागती सुगन्नुष्टुप्पां प्रजापतिस्त्रिष्टुब्वैवस्वतो सुन्वंतं प्रजापतिस्त्रिष्टुब्विसीत
स्तत्वायामि शुनःशेप त्रिष्टुब्वरुणं आ नो नियुद्भिर्वसिष्ठ त्रिष्टुब्वायुस्तमीशानं गोत
मो जगती मीशानो स्मे रुद्राः प्रगाय त्रिष्टुब्लास्यो नामे धातिधिर्गायत्र्यनंतो प्रजा
पतेः षस्मा शिरस्कं कल्प त्रिष्टुब्मनः सहस्रशीर्षा षोडशाद्यं न्नारायणः पुरुषः पंच द
शानुष्टुभः षोडशी त्रिष्टुब्जगती जंपुरुषो ऽद्भ्यः षस्तां प्रत्ववानुवाकस्यार्षमाध्या स्तिस्त्रस्त्रि
ष्टुभो द्वे अनुष्टुभाव वत्सा त्रिष्टुबादित्यं आशुः दशानाम प्रतिरथ त्रिष्टुबिंद्रो विभाड्बृ
हद्विभ्राट् सो सूर्य उदु त्यं तिस्रः प्रस्कण्व एवः प्रतीकचोदितानां ब्रह्मस्तवयं न्वा नो ऽगस्त्यो वे

© Dharmartha Trust J&K. Digitized by eGangotri

रु० स्तु०
१५

15

दघ्नुतकस्मुतंकस्मौतरलिः मस्तक एवसैतन्मूर्ध्वस्य हृद्यो: कुत्सो वैल्य हान्दृ ह्ययोर्जमदग्निः आ
यंतइवनृमेधोऽघादेवाः कुत्संत्वा कस्मेन हिरण्य एवतत्पङ्क्त्यांगिरसो विभाडुगती मुदुत्यं तिस्रो
गायत्र्यस्तंभलपाजगतीमयं वेनास्ति स्त्रस्त्रिष्टुभोऽपदघ गायत्र्यौतत्सूर्ध्वस्य त्रिष्टुभौ वल्प
हान्द्वे बृहतीसतोबृहत्यौ आयंतइव बृहतीमघादेवाद्वे त्रिष्टुभौ सर्वाः सोर्थः॥३॥प्रलव
स्य ब्रह्मा देवी गायत्री परमात्माग्निर्मर्हाव्याहृती नां प्रजापतिर्द्वेवावाऽग्निर्वाग्नं धर्वावाग्नी
लियजूंछंध्यग्निवायुस्त्र्यर्चदेवत्यानिशतरुद्रियं परमेष्ठिनच्चार्षं देवानां वा प्रजापते
र्वाग्निर्यमा गायत्रीति स्त्रोनुष्टुभं स्त्रिस्त्रः पङ्क्त्यः समानुष्टुभो द्वे जगत्यौ मानो द्वे कुत्सस्यै शिवाय०
करुद्रः सर्वासां छंहिरण्यबाहव इत्यादीनि यजूंछंषि मागंत्वानुवाकाद्धकुरुद्रदेवत्यानि
तेषामुभयतो नमस्कारान्यन्येऽन्यतरतो नमस्कारा अपरे हिरण्यबाहव इत्याद्यो द्वे ॥१५॥

© Dharmartha Trust J&K. Digitized by eGangotri

द्विनो रुद्राः समाप्यइत्यादयो ज्ञातासंख्याः ॥ अंत्यानुवाकस्य प्रथमोपरिष्टाद्बृहती द्विती
या जगती ककुप्तस्य तृतीयाऽनुष्टुप् द्वे त्रिष्टुभौ द्वे अनुष्टुभौ वै केरुद्रः स ज्ञाना म संख्याता
द्रशानुष्टुभां प्रत्यवरोह यजुषां चवरुद्वो रुद्रा ॥ अंबकानुवाक्ता अ प्रोदेवानामार्ष ॥ सर्वा
णि यजूंषि अग्निदेवत्यानि शिरः सः प्रजापतिरनुक्तानां वयं ॥ सोमबंधु ॥ त्र्यंबकं पूर्व
स्या यसिष्ठस्त्र्यायुषं नारायणो देवयं ॥ सोम गायत्री सोम एषते द्वे रौद्रे अवरुद्रं पङ्क्तिर्मे यजुषी ५
षजं ककुप् त्र्यंबकं द्वे अनुष्टुभावेतेन त्रात्स्तारपङ्क्तिः पंचमेऽग्र्यं त्र्यायुषमुष्णिहं यजमा
नाशिषः ॥ शिवो नाम यजुः क्षुरं निवर्तयामि यजुर्लिंगोक्तदेवतं ॥ ॥ स वं वा च मध्या
यो वैश्वदेवो दध्यङ्ङाथर्वण ऋषिः सं वं वा चं पं च यजूंषि लिंगोक्तदेवता नियन्ते पङ्क्तिः बृ
हस्पतिर्महाव्याहृतीनां ॥ सावित्र्याश्च दध्यङ्ङाथर्वणो देवतमुक्तं ॥ सावित्र्या गायत्री क

© Dharmartha Trust J&K. Digitized by eGangotri

16

पानस्तिस्त्रोदध्यङ्ङाथर्वणलदृष्टागायत्र्यऐंद्र्यः कयात्वमैंद्र्यनिरुक्तागायत्रीन्द्रोविश्वस्य
द्विपदाविराडिन्द्रःशन्नोद्वेअनुष्टुभौलिंगोक्ताभित्रादयोऽहानिशंद्विपदागायत्रीलिं
गोक्ताअहानिरात्रयःशन्नइंद्राग्नीत्रिष्टुबिंद्राग्न्यादयोलिंगोक्ताःशन्नोदेवीगायत्र्या
पःस्योनादध्यङ्ङाथर्वणलच्छंदउक्तंपृथिव्यौपोहिष्ठातिस्रोदध्यङ्ङाथर्वणलदृष्टागाय
त्र्यआद्वेवत्यांद्यौःशांतिर्द्वादशयजूंषिलिंगोक्तदैवतानिदृतेदृंहेत्यादीनांयजुषां
लिंगोक्ताअंतरिक्षादयोनमस्तेहरसेदध्यङ्ङाथर्वणोबृहतीमग्निर्नमस्तेअस्तुद्वे
अनुष्टुभौविद्युदादयःसुमित्रियादध्यङ्ङाथर्वणोयजुषीआपस्तच्चक्षुःपुरउष्णिक् शिवाय॰
सौरीसद्योजातमित्यादीनांपंचानांसद्योजातवामदेवाघोरतत्पुरुषेशानास्त्रि ॥१६॥
ष्टुब्जगत्यनुष्टुब्गायत्र्यनुष्टुभोरुद्रोग्निरितिभस्मेत्यादीनांपिप्पलादोगायत्रीकाला

© Dharmartha Trust J&K. Digitized by eGangotri

त्रिरुद्रः आपोज्योतिर्यजुर्ब्रह्माग्निवायुसूर्याः आपोहिष्ठातिस्रगा ॐ सिंधुद्वीपश्छंदो
दैवतमुक्तमंक्षी भा ॐ षसांविदहाऽ तुष्टुब्यासमहोः ॐ नमो रुद्राय नमो रुद्राय॥५॥
इतिरुद्रसूत्रेतृतीयोऽध्यायः॥ ॥धीमताऽनंतदेवेनश्रीमदुद्धवसूनुना। त्रैवेदधमो
ढसंज्ञेनकाशीपुरनिवासिना॥१॥मयाविरचितंचैतत्श्रुतिस्मृतिपुराणतः।स्वक
ल्पितत्रशंकात्रनकार्याविबुधैरतः॥२॥परोपकृतयेकृत्वारुद्रसूत्रंसमर्पितं।मदी
यनाथयोर्विष्णुवंद्ययोःशिवपादयोः॥३॥नमदीयाकृतिर्यस्मात्कृतिरेषाशि
वस्यवा।यथाप्रेरितवान्रुद्रस्तथालिखितवानहं॥४॥अध्येतव्यमिदंसूत्रंवि
प्रैर्वाजिसनेयिभिः।रुद्रस्यत्रिविधस्यापिश्रुतत्वज्ञानाभिलाषिभिः॥५॥मुमुक्षुःप्रा
र्थयेहंसज्जनानशुद्धमानसान्।मयोक्तमिहसंशोध्यंविचार्य्यसदसद्बुयतः॥६॥

© Dharmartha Trust J&K. Digitized by eGangotri

ज्ञात्वानुछिष्टमर्थं यः करोति ग्रंथगोपनं। तस्य श्रेयोर्थिनस्तन्नमयाश्चौरो यतो हि सः।
।७।यच्च श्रमः समुत्पन्नो ग्रंथस्यास्य विलेखने। सर्वात्मा तेन विश्वेशः प्रीयतां परम
: शिवः।।८।। इति श्रीमद्द्विवेदी उद्धवात्मजानंतदेवविरचितं रुद्रेतिकर्तव्यताबोधकं
रुद्रसूत्रं संपूर्णम्।। श्रीमत्संवदष्टादशशतसप्तविंशत्यधिकतमेब्दे १८२७ चैत्रकृ
ष्णषष्ठ्यां बुधदिने श्रीकाशीपुरनिवासिना श्रीपरशुरामेश्वरसमीपे श्रीमद्दृढनागर
ज्ञातीयाठमदावादिना श्रीमद्याज्ञिकसर्वात्मात्मजयाज्ञिकदेवकृष्णात्मजकरुणा
कृष्णेन लिखितमिति शिवम्।। ।।अथ व्यक्तवर्णकिं मतोभ्रमाद्वा यदर्थशून्यं लिखि
तम्मयेह। तत्सर्वमार्यैः परिशोधनीयं प्रायेण मुह्यंति हि लेखकस्य।। श्रीरस्तु।। ।।
याज्ञिकदेवकृष्णतनयैर्विजयकृष्णकरुणाकृष्णरविकृष्णाख्यैरिदं पुस्तकं शुभं।। श्रीः।।

शिवाय गुरवे नमः।।
।।९७।।

© Dharmartha Trust J&K. Digitized by eGangotri